# M.A. 1st Semester Examination, 2019

## SANSKRIT

PAPER – SAN-101

*Full Marks* : 40

*Time* : 2 hours

प्रश्नानां सर्वेषामुत्तरं संस्कृतेनैव प्रदेयम्

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

1. (क) अधोनिर्दिष्टेषु पदेषु <u>द्वयोः</u> व्याकरणदिशा साधनप्रक्रिया प्रदर्श्यताम् — $2 \times 2$

    (*i*) दिवेदिवे

    (*ii*) अश्नवत्

    (*iii*) उरूची

    (*iv*) कृण्वन्ति

( *Turn Over* )

(*ख*) यथेच्छं द्वयोः पदयोः सूत्रोल्लेखपूर्वकं स्वराः साध्यन्ताम् — 2 × 2

(*i*) अग्निः

(*ii*) वक्षति

(*iii*) दर्शत

(*iv*) तुविजातौ

**2.** (*क*) अधोलिखितेषु मन्त्रेषु ऋषिच्छन्दोदेवता-निर्देशपूर्वकं मन्त्रत्रयस्य व्याख्या कार्या — 4 × 3

(*i*) उप॑ त्वाग्ने दि॒वेदि॑वे
दोषा॑वस्तर्धि॒या व॒यम् ।
नमो॒ भर॑न्त॒ एम॑सि ।।

(*ii*) वाय॑ उ॒क्थेभि॑र्जरन्ते
त्वामच्छा॑ ज॒रि॒तार॑ः ।
सु॒तसो॑मा अह॒र्विद॑ः ।।

(*iii*) ए॒तावा॑नस्य महि॒मातो॒ ज्यायाँ॑श्च पूरु॑षः ।
पादो॑ऽस्य॒ विश्वा॑ भूतानि त्रि॒पाद॑स्या॒मृत॑ दि॒वि ।।

(*iv*) न मृ॒त्युरा॑सीद॒मृत॒ं न तर्हि॒
न रात्र्या॒ अह्न॑ आसीत्प्रके॒तः ।
आनी॑दवा॒तं स्व॒धया॒ तदेकं॒
तस्मा॑द्धा॒न्यन्न प॒रः किं च॒नास ।।

(*v*) येन कर्माण्यपसो मनीषिणो
यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां
तन्मे मनः शिवसङ्कल्पमस्तु ॥

(*vi*) यस्यां समुद्र उत सिन्धुरापो
यस्यामन्नं कृष्टयः संबभूवुः ।
यस्यामिदं जिन्वति प्राणदेज-
त्सा नो भूमिः पूर्वपेये दधातु ॥

(*ख*) अधस्तनयोरेकतरस्य भाष्यवचनस्याशयः स्फुटीक्रियताम् — 4 × 1

(*i*) तस्मिन्सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः ।

(*ii*) 'वायवायाही' त्यादयस्तृचाः प्रउगशस्त्रे विनियुक्ताः ।

**3.** अधोलिखितेषु प्रश्नेषु किमपि प्रश्नद्वयं समाधेयम् — 8 × 2

(*क*) इन्द्रदेवतायाः वायुदेवतायाः वा चारित्रिकवैशिष्ट्यं सम्यगालोच्यताम् ।

(*ख*) ऋग्वेदस्य विश्वामित्र-नदीसंवादसूक्तस्य सारसंक्षेपं प्रस्तूयताम् ।

(ग) नासदीयसूक्तस्य दार्शनिकतत्त्वम् आलोच्यताम् ।

(घ) पृथिवीसूक्तस्य वैशिष्ट्यं प्रतिपाद्यताम् ।

---